# प्रव्रज्यायोगः

डॉ. अनिलकुमारः
अं. सहायकाचार्यः,
ज्योतिषविभागः
भोपालपरिसरः, केन्द्रीयसंस्कृतविश्वविद्यालयः

**अनाश्रमी न तिष्ठेत् क्षणमेकमपि द्विजः।**
**आश्रमादाश्रमं गच्छेदेष धर्मः सनातनः ।।**

इति धिया ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्यासात्मकानां चतुर्णाम् आश्रमाणाम् अनुसरणं सर्वैरेव मानवैः अनिवार्यरूपेण कर्त्तव्यम् । जगति व्यवस्थेयं प्रायशः नियमत्वेन परिदृश्यते । आश्रमाणां परिपालने प्रत्येकम् आश्रमाय पञ्चविंशतिः वर्षाणि यद्यपि पूर्वाचार्यैः प्रतिपादितानि तथापि अद्यतनीय-सर्वकारेण गृहस्थाश्रमे प्रवेशार्थं युवकानां युवतीनां च कृते क्रमशः एकविंशतिवर्षात्मिकम् अष्टादशवर्षात्मकम् आयुः सुनिश्चितम् । इमे नियमाः सांसारिकजनानां कृते भवन्ति । संसारेऽस्मिन् केचन ईदृशाः मानवाः अपि वर्तन्ते ये मोह-क्रोध-कामेभ्यः विमुक्ताः सन्ति । तेषां कृते न भवति चतुराश्रमाणां परिपालने अनिवार्यता । ते तु गृहस्थाश्रमस्थाने सन्यासाश्रममेव अङ्गीकुर्वन्ति । ते तु स्वकीयः ईश्वरेण अभेदं मत्त्वा स्पष्टरीत्या कथयन्ति यत् –

**अहं निर्विकल्पो निराकाररूपो**
**विभुत्वाच्च सर्वत्र सर्वेन्द्रियाणाम् ।**
**न चासङ्गतं नैव मुक्तिर्न मेयः**
**चिदानन्दरूपः शिवोऽहं शिवोहम् ।।**

तत्र तेषां दुःखमये गृहस्थजीवने अनासक्तेः, परमतत्त्वे नितरां रूचेः, सत्त्वप्रधानाचरणस्य, मोक्षप्रवृतेश्च कारणं किमपि प्राग्जन्मार्जितं पुण्यम् अवश्यमेव वर्तेत । यतो हि अस्य मानवजन्मनः प्रयोजनं तु मोक्षप्राप्तिरेव ।

अतः मोक्षप्राप्तये मानवोऽयं सन्यासी भविष्यति न वेति प्रश्नोत्पन्ने सति जन्मजन्मान्तराणां ज्ञानं कृत्वा अस्मिन् जन्मनि प्राप्यफलानां वर्णनस्य केवलं ज्योतिषशास्त्रे एव सामार्थ्यम् अस्ति । यथा आचार्यः कल्याणवर्मा सारावल्यां भणति –

**विधात्रा लिखिता याऽसौ ललाटेऽक्षरमालिका ।**
**दैवज्ञस्तां पठेद् व्यक्तं होरानिर्मलचक्षुषा ।।**

त्रिकालज्ञैः पूर्वाचार्यैः ज्योतिषशास्त्रीय-होरास्कन्धस्य प्रायशः सर्वेषु ग्रन्थेषु प्रव्रज्यायोगाः प्रतिपादिताः। प्रव्रज्यायोगमधिकृत्य महर्षिपराशरस्य " **येनापहाय सर्वस्वं विरक्ता गेहिनो**

**जनाः"** अनेन वचनेन सिद्ध्यति यत्  येषां जन्मांगचक्रे प्रव्रज्याख्यः अयं योगः भवेत् ते मानवाः सर्वं विहाय विरक्ताः भवन्ति। अतः प्रव्रज्यायाः विशेषज्ञानार्थम् अत्र प्रव्रज्यायोगाः, प्रव्रज्यादेवाः, प्रव्रज्याभेदाः, प्रव्रज्यायाः प्राप्तिकालः, प्रव्रज्याभङ्गयोगाश्च उपस्थाप्यन्ते ।

**<u>प्रव्रज्यायोगाः</u> –** ज्योतिषशास्त्रोक्तेषु नानाविधयोगेषु प्रव्रज्यायोगाः अपि महर्षिपराशर-वराहमिहिर-मन्त्रेश्वर-वैद्यनाथप्रभृतयःदैवज्ञाः प्राबल्येन निर्दिष्टवन्तः। तत्र जातकपारिजाते स्पष्टतया विवेचितमस्ति यद् बलवतां चतुर्णाम् अथवा पञ्चानां षण्णां वा ग्रहाणाम् एकस्मिन् भावे व्यवस्थितिवशाद् अयं प्रव्रज्यायोगः भवति, अर्थात् सप्तानां ग्रहाणां एकत्रस्थितिवशात् न योगोऽयम् उत्पद्यते। बृहत्पाराशरहोराशास्त्रानुसारेण यस्य जन्मकाले एकस्मिन्नेव भावे चतुष्प्रभृतयः ग्रहाः स्थिताः स्युः स जातकः प्रव्राजको भवति । प्रसंगेऽस्मिन् प्रायशः सर्वेषाम् आचार्याणां मतैक्यं दृश्यते । यथा फलदीपिकायां मन्त्रेश्वरेणोद्घोषितम् –

**एकर्क्षसंस्थैश्चतुरादिकैस्तु ग्रहैर्वदेत्तत्र बलान्वितेन ।**
**प्रव्रज्यकां तत्र वदन्ति केचित् कर्मेशतुल्यां सहिते खनाथे ।।**[1]

एकस्मिन् भावे स्थितेषु चतुष्प्रभृतिग्रहेषु यो ग्रहः सर्वाधिकबलवान् स्यात् तस्यैव प्रव्रज्यां मानवः प्राप्नोतीति नियमः वर्तते, परं यदि तत्र न कश्चिद् बली भवेत्तर्हि जातकस्य जीवने प्रव्रज्या न भवतीति । यदि प्रव्रज्याकारकग्रहेषु द्वौ बलवन्तौ ग्रहौ भवेतां तर्हि मानवः प्रव्रज्याद्वयमवाप्नोति । तत्र बहवो बलिनः ग्रहाः स्युः तदा बह्वयः प्रव्रज्याः जीवने समायान्ति । एवं प्रव्रज्याकारकौ द्वावेव ग्रहौ अपराजितौ भवतः तदा प्रथमप्रव्रज्यादायकान्तर्दशायां प्रथमां प्रव्रज्यां गृहीत्वा तामेवाश्रित्य तावत्तिष्ठति , यावद् द्वितीयप्रव्रज्यादायकग्रहान्तर्दशाप्रवेशः। तत्र प्रथमां त्यक्त्वा द्वितीयामाश्रयति । इत्थं बहुप्रव्रज्याकारकग्रहेषु अपि दशावशात् प्रव्रज्याप्राप्तिकालः चिन्तनीयः। यदि प्रव्रज्याकारको ग्रहः पराजितः स्यात्तर्हि जातकः प्रव्राजको भूत्वा प्रव्रज्यां त्यजति। प्रव्रज्यायोगानां वर्णनावसरे सारावल्यां आचार्यकल्याणवर्मणा स्पष्टतया उद्घोषितं यद् मुनियोगे उत्पन्नमानवस्य जन्मकाले यदि राजयोगोऽपि स्यात्तहि नृपो भूत्वा तदानन्तरं प्रव्रज्यामपि प्राप्नोति । अस्मिन् प्रव्रज्याकालेऽपि स नृपवत् सम्मानितो भवति। प्रव्रज्यायाः प्रत्यक्षप्रभावविषये दैवज्ञैः निरूपितमस्ति। इत्थं प्रव्रज्यायाः दिग्दर्शनमात्रं मया प्रदर्शितं, प्रव्रज्यादेवान् उदित्वा तदनन्तरं प्रव्रज्याकारकयोगानां विस्तृतं विवेचनं भविष्यति।

## <u>प्रव्रज्याभेदाः</u>

जन्मांगचक्रे प्रव्रज्यास्ति इति ज्ञात्वा तदनन्तरं क्रमो भवति प्रव्रज्यायाः प्रकृतेः अवलोकनस्य । सन्दर्भेऽस्मिन् बृहत्पाराशरहोराशास्त्रे दृश्यते यत् -

**सबलैरेकभगैश्चतुष्प्रभृतिभिर्ग्रहैः**
**सूर्यादिभिस्तापसः कपाली लोहिताम्बरः**
**दण्डी यतिश्चक्रधारी वीतवासः क्रमादिति**

**बलिषु प्रबलस्यैव बोध्या बहुषु विद्वरैः ।[2]**

अर्थात् मानवस्य जन्मकाले प्रव्रज्याकारकग्रहेषु यो ग्रहः सर्वाधिकः बली स्यात् सः तदनुसारिणीं प्रव्रज्यामवाप्नोति। अतः सूर्यात् शनिपर्यन्तं सप्तग्रहाणां प्रभावेन प्रव्रज्येयं सप्तविधा वर्तते। यथा सूर्येण तपस्वी , चन्द्रेण कपालिकः , भौमेन रक्तवस्त्रधारी , बुधेन दण्डी , गुरुणा यति , शुक्रेण चक्रधारी , शनिना दिगम्बरः भवति। इत्थं प्रव्रज्यायोगे उत्पन्नस्य जातकस्य कीदृशी प्रव्रज्या भवति इत्यस्मिन् विषये ग्रहानुसारेण प्रव्रज्यायाः वर्णनावसरे महर्षिपराशर-वैद्यनाथ-वराहमिहिरादयः आचार्याः तु स्वकीयग्रन्थेषु तापसस्-कपालीसंज्ञकभेदानां केवलं संकेतमात्रं कृतवन्तः। परञ्च आचार्यकल्याणवर्मणा प्रव्रज्यामधिकृत्य विशेषविवेचनं कृतं यतो हि सूर्यः मानवं तपस्विनं करोतीति सर्वत्र वर्णितमस्ति परं सः कीदृशीं तपस्यामाचरतीति स्पष्टयन् कल्याणवर्मा सारावल्यां कथयति यत् -

**अग्नीनां परिचारका गिरिनदीतीराश्रमे तापसाः ,**
**सूर्याराधनतत्परा गणपतेर्भक्ता उमायाश्च ये ।**
**गायत्रीं जपतां वने नियमिनां गंगाभिषेकार्थिनां ,**
**कौमारव्रतमिच्छतामधिपतिस्तेषां सदाभासाकरः ।।[3]**

अर्थात् प्रव्रज्यानिर्धारणावसरे सूर्येण प्रभावितः मानवः अग्न्युपासकः (अग्निहोत्री) पर्वते नदीतटे वा स्थिताश्रमे निवसति , सूर्योपासकः , गणपतेः पार्वत्याश्च भक्तः , गायत्रीजपनिरतः, वनस्थः नियमान् पालयति , गंगास्नानार्थी , ब्रह्मचर्यव्रतयुक्तः , तपस्वी च भवति । अर्थात् एतेषां सर्वेषां तपस्वीनाम् अधिपतिः सूर्यः वर्तते ।

- चन्द्रेण मानवः कपालिको भवतीति प्रायशः सर्वेषामाचार्याणां मतमस्ति परञ्च आचार्यकल्याणवर्मा विस्तारयन् प्रतिपादयति यत् चन्द्रेण (वृद्धः) वृद्धावस्थायां सन्यासी , धर्मशास्त्रश्रवणतत्परः ब्राह्मणः (श्रावकः), भस्मलेपधारी, शैवः, आचारविरहितः, वाममार्गी, शाक्तः, उदासीनः, सोमागमानुयायी, निष्ठुरः, खट्वांगधारी च मानवो भवति । अतः एतेषां स्वामी ग्रहः चन्द्रो वर्तते । तद्यथा –

**वृद्धश्रावकभस्मधूलिवलाः शैवव्रते ये स्थिता**
**बाह्याः पातकितां गता भगवतीभक्ताश्च निःसंगिनः ।**
**सुद्धान्ते खलु सोमनाम्नि निरताः कापालिका निष्ठुराः**
**तेषां नायकतां गतः शशधरः खट्वांगपाणिद्युतिः ।।[4]**

- सारावल्यनुसारेण रक्ताम्बरप्रव्रज्याप्रदायकेन भौमेन मनुष्यः बौद्धमतानुयायी, शिखाविरहितः, पाण्डरभिक्षुः, उत्तमवस्त्रधारी, लोहितपटान्वितः, जितेन्द्रियश्च भवति। एषां समेषां अधिपो भौमो विद्यते।[5]

- यदि बुधेन प्रव्रज्या प्राप्यते तर्हि मानवः विषचिकित्सकः , मयूरपक्षधृत् , मयूरपक्षेण तान्त्रिकक्रियाकर्ता च भवति।[6]
- कषायवस्त्रधारी , एकं त्रयं वा दण्डभृत , वानप्रस्थी , दुग्धाहारी फलाहारी वा भिक्षुः, गृहस्थाश्रमे स्थितोऽपि नियमरतः, सद्ब्रह्मचारी, तीर्थस्थः स्नातकः च गुरुणा मनुष्यो भवति।[7]
- शैवयज्ञे, शैवदीक्षायां, शैवव्रते वा संलग्नः, वैष्णवसाधूनां मुख्यः वा मानवः शुकेण भवति।[8]
- शनिप्रव्रज्यायां पाषण्डः (सर्वलिङ्गिन्), दिगम्बरः, भिक्षुः, बौद्धभिक्षुः, वृक्षमूलनिवासी, कठिनतपनिरतः वा जातकः भवति ।[9]

ग्रहानुसारिणीं प्रव्रज्यामवलम्ब्य आचार्यैः बहुविवेचनं कृतं तथा तत्र केषां देवानां भक्तिः भवतीत्यस्य दिग्दर्शनमात्रं कृतम्। क्रमेऽस्मिन् बृहज्जातकस्य टीकायां भट्टोत्पलेन कस्यचिद् आचार्यस्य मतमधिकृत्य प्रव्रज्यानां देवाः उल्लिखिताः सन्ति। तद्यथा - सूर्यस्य प्रव्रज्यायां जलण (साग्निकः) अग्न्युपासकः चन्द्रप्रव्रज्यायां हर (शिवभक्तः) मंगलस्य प्रव्रज्यायां सुगअ(बौद्धः) बुधस्य प्रव्रज्यायां केसव(केशवभक्तः) गुरुप्रव्रज्यायां सूई (श्रुतिमार्गगतः,मीमांसकः) शुक्रप्रव्रज्यायां ब्रह्मण्ण (वानप्रस्थः) शनेः प्रव्रज्यायां णग्ग(क्षपणकः) मानवः भवति। प्रव्रज्यायाः देवतानिर्धारणावसरे यदि वयं ग्रहदेवताः स्वीकुर्मश्चेत् तर्हि नास्ति कश्चिद्दोषः। बृहज्जातके ग्रहदेवताकथयन् आचार्यवराहमिहिरः स्पष्टयति – **"वह्नयम्ब्वग्निजकेशवेन्द्रशचिकाः सूर्यादिनाथाः क्रमात्"** अर्थात् सूर्यस्य अग्निः, चन्द्रस्य जलम्, मंगलस्य कार्तिकेयः, बुधस्य केशवः, गुरोः इन्द्रः, शुक्रस्य शचिः(शक्तिः), शनेः ब्रह्मा पूज्याः देवाः सन्ति। वस्तुतः कर्मकाण्डानुसारेण इमे देवाः ग्रहाणां प्रत्यधिदेवताः सन्ति अन्तरत्वेन तु मंगलस्य पृथ्वी तथा शनेः प्रजापतिरेव दृश्यते। तत्र कर्मकाण्डविधौ ग्रहाणाम् अधिदेवताः अपि प्रतिपादिताः सन्ति ते च क्रमशः शिवः, उमा, स्कन्दः, विष्णुः, ब्रह्मा, इन्द्रः, यमश्च भवन्ति। अतः ग्रहानुसारेण उपर्युक्तेषु एव कश्चिद्देवविशेषः प्रव्रज्यायाः देवः स्यादिति। द्रष्टव्यं चक्रमिदम् -

| **प्रव्रज्याफलम्** | **सूर्यः** | **चन्द्रः** | **मंगलः** | **बुधः** | **गुरुः** | **शुक्रः** | **शनिः** |
|---|---|---|---|---|---|---|---|
| **बृहत्पाराशरहोराशास्त्रम्** | तपस्वी | कपालिकः | रक्तवस्त्रधारी | दण्डी | यति (जितेन्द्रियः) | चक्रधारी | दिगम्बरः |
| **फलदीपिका**[10] | योगीशः | तीर्थयात्री | बौद्धः, दुर्मन्त्रज्ञः | परम्परातः भिन्नं मतमनुसरति | वेदान्तज्ञः, यतिवरः वा | स्वार्थसिद्धये सन्न्यासरूपयुक्तः न तु वास्तविक-तपस्वी | पाषण्डी, पतितः वा |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **जातकपारिजातः**[11] | वानप्रस्थः | गुरुः (राजसम्पद्युतः) | शक्यः (दुराचारवान्) | जीवकः (केवलम् उदरम्भरः) | भिक्षुः( एकदण्ड-धरः, ब्रह्म-विचारणपरः ) | चरकः(नानादेश-प्रवासी) | नग्नशीलः |
| **बृहज्जातकम्**[12] | वन्याशनः (मूलफलाशनः, तपस्वी) | वृद्धश्रावकः ( कापालिकः) | शाक्य ( रक्तपटः) | आजीविकः (एकदण्डी) | भिक्षु (यति) | चरकः (चक्रधरः) | निर्ग्रन्थः ( नग्नः) |
| **भट्टोत्पलटीकायां प्रव्रज्यायाः देवताः** | जलण (साग्निकः) | हर (शिवभक्तः) | सुगअ (बौद्धः) | केसव (केशवभक्तः) | सूई (श्रुतिमार्गगतः, मीमांसकः) | ब्रह्मण्ण (वानप्रस्थः) | णग्ग (क्षपणकः) |
| **ग्रहाणां देवताः** | अग्निः | जलम् | कार्तिकेयः | केशवः | इन्द्रः | शचिः | ब्रह्मा |
| **ग्रहाणाम् अधिदेवताः (कर्मकाण्डे)** | अग्निः | जलम् | पृथ्वी | केशवः | इन्द्रः | शचिः | प्रजापतिः |
| **ग्रहाणां प्रत्यधिदेवताः (कर्मकाण्डे)** | शिवः | उमा | स्कन्दः | विष्णुः | ब्रह्मा | इन्द्रः | यमः |

## स्त्रीणां कृते प्रव्रज्यायोगः

स्त्रीणां कृते प्रव्रज्यायोगवर्णनावसरे महर्षिपराशरः विशिष्टं योगं प्रतिपादयति-

**क्रूरे सप्तमगे कश्चित् खेचरो नवमे यदि ।**
**सा प्रव्रज्यां तदाप्नोति पापखेचरसंभवाम् ॥**[13]

यस्याः जन्मकाले पापयुतौ सप्तम-नवमभावौ भवेतां सा नारी पापग्रहस्य प्रव्रज्यां प्राप्नोति।

## प्रव्रज्यायोगाः

1 चतुर्भिर्ग्रहैः युक्तो दशमेशो यदि केन्द्रे त्रिकोणे वा स्यात्तर्हि मानवः मुक्तिमार्गनिरतः भवति।

2 राशेः अन्तिमभागस्थं लग्नं यदि शुभग्रहस्य नवांशे अपि स्थितं स्यात्तथा गुरुः केन्द्रे त्रिकोणे वा भवेत्तर्हि संसाराद् मुक्तो मनुष्यो भवति।[14]

3 एकस्मिन् राशौ चतुष्प्रभृतयः ग्रहाः स्युः तदा प्रव्रज्यायोगो भवति, परं कस्य प्रव्रज्या स्यात् इस्यस्मिन् विषये केषाञ्चन आचार्याणां मतमस्ति यत् यदि प्रव्रज्याकारकग्रहेषु दशेमेशः

स्यात्तर्हि दशमेशस्यैव प्रव्रज्या भवति।[15] अत्र दशमभावग्रहणस्य कारणमिदं प्रतीयते यद् प्रव्रज्याकारकः प्रमुखभावः दशमभावः एव अस्ति। यतो हि आचार्य वैद्यनाथेन दशमभावः एव प्रव्रज्याभावत्वेन स्वीकृतोऽस्ति।

4 शनेः द्रेष्काणे स्थितः चन्द्रः यदि शनिमंगलाभ्यां दृष्टो भवेत्तर्हि मनुष्यः तपस्वी भवति।

5 मंगलस्य नवांशे स्थितः चन्द्रः यदि शनिना दृष्टः स्यात्तर्हि मंगलस्य प्रव्रज्याम् अंगीकरोति।[16]

6 शनेः द्रेष्काणस्थः चन्द्रः यदि भौम-शनयोरन्यतरस्य ग्रहस्य नवांशे स्थितः स्यात् तथा च शनेः दृष्टिरपि चन्द्रोपरि विद्यात् तदा मानवः शनेः प्रव्रज्याम् अवाप्नोति।[17]

7 यस्य जन्मांगचक्रे लग्नेशेन दृष्टः, निर्बलचन्द्रः स्यात्तर्हि स मानवः तपस्वी, शोकसंतप्तः, धन-जनरहितश्च भूत्वा कष्टेन अन्न-पानदिकं प्राप्नोति।[18]

8 दशमेशेन युताः चत्वारः ग्रहाः यदि केन्द्रे त्रिकोणे वा स्युः तदा जातकस्य संन्याससिद्धिः भवति।

9 यदि शुभस्थाने बलवन्तः त्रयः ग्रहाः स्थिताः स्युः तर्हि मानवः संन्यासी भवति।

10 यदा शुभग्रहाः अतिशुभस्थानेषु भवेयुः तदा महद्भिः पूजिता प्रव्रज्या प्राप्यते।[19]

11 दशमभावे स्थितमीनराशौ यदि बुधभौमौ भवेतां तर्हि जातकः मुक्तो भवति।

12 अन्यग्रहैः अदृष्टः जन्मराशीशः यदि शनिना दृष्टः स्यात्तर्हि शनि-जन्मराशीशयोः मध्ये यो बलवान् भवेत्तस्यानुसारिणीं प्रव्रज्यां मानवः प्राप्नोति । परञ्च यदि शनिना एव दृष्टः जन्मराशीशः निर्बलः स्यात्तर्हि मानवः शनेः प्रव्रज्यां दधाति।[20]

13 यदि सर्वे ग्रहाः निर्बलाः अस्तंगताश्च स्युः केवलं सूर्यः बलवान् भवेत्तर्हि सूर्यस्य प्रव्रज्यां मानवः प्राप्नोति।[21]

14 यदि प्रव्रज्याकारकाः सर्वेऽपि ग्रहाः बलिनः स्युस्तदा जातकः तेषां सर्वेषां ग्रहाणां प्रव्रज्यां दशानुसारेण क्रमशः दधति ।[22]

15 शनिः यदि गुरु-लग्न-चन्द्रान् पश्येत्तथा च गुरुः नवमभावस्थः स्यात्तदा नृपो भूत्वाऽपि नरः तीर्थकरः (सम्प्रदायस्य प्रवर्तकः) भवति।[23]

16 यस्य जन्मकाले नवमभावस्थः शनिः अन्यग्रहैः अदृष्टः स्यात् स जातकः प्रव्रज्यायुक्तः राजा भवति।[24]

17 ग्रहैरन्यैः अदृष्टः चन्द्रः नवमभावे स्यात्तदा जातः मानवः प्रव्रज्यया दीक्षितः नृपो भवति।[25]

18 ग्रहैरन्यैः अदृष्टः लग्नेशः यदि शनिना दृष्टः स्यात्तर्हि मनुष्यः संन्यासी भवति।

19 निर्बलं लग्नेशं यदि शनिः पश्येत्तर्हि मनुष्यः संन्यासी भवति।[26]

20 दशमभावस्थाः बलिनः त्रयः ग्रहाः स्वोच्चादिवर्गस्थाः स्युः तथा यदि दशमेशः बलाधिकः भवेत्तदा जातकः यतिः तत्तुल्यशीलवान् वा भवति।[27]

21 प्रव्रज्याकारकग्रहाः यदि सूर्य-शनि-मंगलैर्युक्तो भवेत्तर्हि धन-संतान-स्त्रीविरहितः मानवः संन्यासम् अवाप्नोति।

22 शुभनवांशस्थः सूर्यः उच्चान्तगतं ग्रहं पश्येत् तदा जातो नरः बाल्यावस्थायां यौवनावस्थायां वा संन्यासी भवति।[28]

23 स्वोच्चराश्यंशे स्थितः कश्चित् ग्रहः यदि चन्द्रं पश्येत्तर्हि मानवः भिक्षुः भवति।[29]

24 एकस्मिन् राशौ स्थिताः त्रयः त्र्याधिकाः वा ग्रहाः यदि लग्नेश्वरं पश्येयुः तदा जातः मानवः दीक्षितः प्रव्राजकः भवति।[30]

25 यस्मिन् राशौ चन्द्रः स्थितः स्यात् तस्य स्वामिनं यदि शनिः लग्नेशो वा पश्येत् तर्हि जातकः दीक्षितः प्रव्राड् भवति।[31]

**एकस्मिन् राशौ केषां चतुर्णाम् अथवा पञ्चानां षण्णां वा ग्रहाणां संस्थितिवशात् कीदृशी प्रव्रज्या भवति ? अस्य सूक्ष्मतया प्रतिपादनं सारावल्यां जातकपारिजाते च समुपलभ्यते। वस्तुतः अत्र विशेषविवेचनस्यास्य कारणमिदमस्ति यद् यथा शुभाशुभयोगेषु ग्रहयुतिवशात् तेषां फलानि प्रभावितानि भवन्ति तथैव प्रव्रज्यायोगेऽपि प्रव्रज्याप्रकृतौ विशिष्टं परिवर्तनं अनुभूयते। यतो हि -**

26 प्रबलाः शुक्र-सूर्य-मंगल-शनयः एकस्मिन् भावे व्यवस्थिताः स्युः तदा जातः मनुष्यः तपस्वी भवति।

27 प्रबलाः गुरु-सूर्य-मंगल-शनयः एकस्मिन् भावे व्यवस्थिताः स्युः तदा जातः मनुष्यः तपस्वी भवति।

28 प्रबलाः सूर्य-चन्द्र-गुरु-शनयः एकस्मिन् भावे व्यवस्थिताः स्युः तदा जातः मनुष्यः तपस्वी भवति।[32]

29 सूर्य-चन्द्र-गुरु-शनयः एकत्र स्थिताः स्युः तदा प्रजातः मनुष्यः मूलफलाशनः तपस्वी भवति।

30 सूर्य-चन्द्र-शुक्र-शनयः एकत्र स्थिताः स्युः तदा प्रजातः मनुष्यः मूलफलाशनः तपस्वी भवति।

31 सूर्य-मंगल-बुध-गुरवः एकत्र स्थिताः स्युः तदा प्रजातः मनुष्यः मूलफलाशनः तपस्वी भवति।[33]

32 यदि सूर्य-मंगल-बुध-शुक्राः एकत्र स्थिताः स्युः तर्हि मानवः वल्कल-भस्मधारी यतिः भवति।

33 यदि चन्द्र-मंगल-बुध-गुरवः एकत्र स्थिताः स्युः तर्हि मानवः वल्कल-भस्मधारी यतिः भवति।[34]

34 यदि चन्द्र-मंगल-बुध-शनयः एकस्मिन् भावे स्थिताः स्युः तर्हि मानवः शान्तचित्तात्मकः तपस्वी भवति।

35 यदि मंगल-बुध-गुरु-शनयः एकस्मिन् भावे स्थिताः स्युः तर्हि मानवः शान्तचित्तात्मकः तपस्वी भवति।[35]

36 यदा बलवन्तः सूर्य-चन्द्र-बुध-शुक्राः एकस्मिन् भावे स्थिताः स्युः तदा उत्पन्नः मानवः वल्कलधारी, कन्दमूल-फलाहारी यतिः भवति।

37 यदा बलवन्तः मंगल-बुध-शुक्र-शनयः एकस्मिन् भावे स्थिताः स्युः तदा उत्पन्नः मानवः वल्कलधारी, कन्दमूल-फलाहारी यतिः भवति।

38 यदा बलवन्तः चन्द्र-गुरु-शुक्र-शनयः एकस्मिन् भावे स्थिताः स्युः तदा उत्पन्नः मानवः वल्कलधारी, कन्दमूल-फलाहारी यतिः भवति।[36]

39 सूर्य-चन्द्र-मंगल-शुक्राः एकत्र स्थिताः स्युः तदा जातः मनुष्यः पर्वत-वननिवासी सर्ववन्द्यः तपस्वी भवति।

40 सूर्य-चन्द्र-मंगल-बुधाः एकत्र स्थिताः स्युः तदा जातः मनुष्यः पर्वत-वननिवासी सर्ववन्द्यः तपस्वी भवति।

41 सूर्य-गुरु-शुक्र-शनयः एकत्र स्थिताः स्युः तदा जातः मनुष्यः पर्वत-वननिवासी सर्ववन्द्यः तपस्वी भवति।

42 चन्द्र-गुरु-शुक्र-शनयः एकत्र स्थिताः स्युः तदा जातः मनुष्यः पर्वत-वननिवासी सर्ववन्द्यः तपस्वी भवति।

43 चन्द्र-मंगल-बुध-शुक्राः एकत्र स्थिताः स्युः तदा जातः मनुष्यः पर्वत-वननिवासी सर्ववन्द्यः तपस्वी भवति।[37]

44 दशमभावे यदि चत्वारः ग्रहाः स्युः तर्हि जातकः संन्यासी भवति।[38]

45 एकस्मिन्नेव भावे सूर्य-मंगल-गुरु-शुक्र-शनयः संस्थिताः स्युः तदा जातः मनुष्यः वनवासी पर्वतचारी वा तपस्वी भवति।

46 एकस्मिन्नेव भावे चन्द्र-मंगल-बुध-गुरु-शनयः संस्थिताः स्युः तदा जातः मनुष्यः वनवासी पर्वतचारी वा तपस्वी भवति।

47 एकस्मिन्नेव भावे चन्द्र-मंगल-बुध-शुक्र-शनयः संस्थिताः स्युः तदा जातः मनुष्यः वनवासी पर्वतचारी वा तपस्वी भवति।[39]

48 सूर्य-चन्द्र-मंगल-बुध-गुरवः एकस्मिन्नेव भावे स्थिताः स्युः तदा जातः मनुष्यः अस्त्रनिन्दकः सज्ज्ञानप्रर्वत्तकशास्त्रकर्त्ता मुनि भवति।

49 सूर्य-चन्द्र-मंगल-बुध-शुक्राः एकस्मिन्नेव भावे स्थिताः स्युः तदा जातः मनुष्यः अस्त्रनिन्दकः सज्ज्ञानप्रर्वत्तकशास्त्रकर्त्ता मुनि भवति।[40]

50 चन्द्र-मंगल-गुरु-शुक्र-शनयः एकत्र स्थिताः स्युः तदा जातः मनुष्यः दुखितः, दीनः, यती च भवति।

51 चन्द्र-मंगल-बुध-गुरु-शुक्राः एकत्र स्थिताः स्युः तदा जातः मनुष्यः दुखितः, दीनः, यती च भवति।

52 सूर्य-मंगल-बुध-गुरु-शनयः एकत्र स्थिताः स्युः तदा जातः मनुष्यः दुखितः, दीनः, यती च भवति।[41]

53 यदि मंगल-बुध-गुरु-शुक्र-शनयः एकस्मिन् राशौ स्थिताः स्युः तर्हि मनुष्यः जटाधरः वल्कलधारी च संन्यासी भवति।

54 यदि सूर्य-चन्द्र-मंगल-बुध-शनयः एकस्मिन् राशौ स्थिताः स्युः तर्हि मनुष्यः जटाधरः वल्कलधारी च संन्यासी भवति।[42]

55 सूर्य-चन्द्र-मंगल-गुरु-शुक्र-शनयः एकत्र स्थिताः स्युः तदा जातकः सदा तपस्वी मुनिः भवति।

56 सूर्य-चन्द्र-बुध-गुरु-शुक्र-शनयः एकत्र स्थिताः स्युः तदा जातकः सदा तपस्वी मुनिः भवति।[43]

57 सूर्य-मंगल-बुध-गुरु-शुक्र-शनयः बलिनः स्युः तदा जातकः तपस्विनां मध्ये प्रधानतपस्वी भवति।

58 चन्द्र-मंगल-बुध-गुरु-शुक्र-शनयः बलिनः स्युः तदा जातकः तपस्विनां मध्ये प्रधानतपस्वी भवति।[44]

59 सूर्य-चन्द्र-मंगल-बुध-गुरु-शुक्राः एकत्र स्थिताः स्युः तदा मानवः विशालनेत्रयुक्तः तपस्वी भवति।

60 सूर्य-चन्द्र-मंगल-गुरु-शुक्र-शनयः एकत्र स्थिताः स्युः तदा मानवः विशालनेत्रयुक्तः तपस्वी भवति।[45]

61 यदि प्रव्रज्याकारकः ग्रहः गुलिकेन अथवा राहुणा, केतुना वा युक्तः स्यात् तथा पापग्रहस्य नवांशे भवेत् तर्हि **आचरणहीनः यतिः** भवति।[46]

**62 तद्योगप्रदभावकारकदशाभुक्तौ तदीयं फलम्**[47] अर्थात् प्रव्रज्यायोगकारकस्य दशायामेव प्रव्रज्यासम्बन्धिनं फलं मानवः प्राप्नोति।

## प्रव्रज्याभंगयोगाः

ज्योतिषशास्त्रे योगविशेषान् उक्तवा तद्भंगकारकयोगाः अपि महर्षिभिः प्रतिपादिताः सन्ति। यथा सन्दर्भेऽस्मिन् अरिष्टयोगाः अरिष्टभंगयोगाः, विषकन्यायोगः विषकन्याभंगयोगः, राजयोगः राजभंगयोगः च परिदृश्यन्ते। यतो हि यदि कस्यचिद् जन्मांगचक्रे प्रव्रज्यायोगः भवेत्तर्हि प्रव्रज्याजन्यफलं प्राप्नोति परं यदा प्रव्रज्याभंगयोगोऽपि विद्यात् अर्थात् प्रव्रज्याविनाशिनी काचिद् ग्रहस्थितिः वर्तेत तदा प्रव्रज्याजं फलमिदं विनश्यति। अतोऽत्र प्रव्रज्याभंगकारकान् योगान् प्रस्तौमि।

- यदि प्रव्रज्याकारकः ग्रहः ग्रहयुद्धे पराजितः स्यात् तर्हि मनुष्यः प्रव्रज्याम् अवाप्य पुनः तां प्रव्रज्यां त्यजति।[48]
- **रविलुप्तकरैरदीक्षिता बलिभिस्तद्गतभक्तयो नराः ।**

**अभियाचितमात्रदीक्षिता निहतैरन्यनिरीक्षितैरपि ।।**[49] अनेन श्लोकेन आचार्यवराहमिहिरः स्पष्टयति यद् एकत्र स्थिताः बलिनः प्रव्रज्याकारकग्रहाः अस्तंगताः स्युः तर्हि मानवः तद्भक्तियुक्तः तु भवति परञ्च दीक्षितः न भवति । प्रव्रज्याकारकः यदि अन्येन ग्रहेण पराजितो दृष्टश्च स्यात्तहि दीक्षाहेतु प्रार्थ्यमान तु भवति परं तां प्रव्रज्यां न प्राप्नोति । अस्तंगतग्रहविषये मतमिदमेव महर्षिपराशरस्यापि वर्तते।

- यदि प्रव्रज्यायोगे उत्पन्नस्य मानवस्य जन्मांगचक्रे राजयोगोऽपि स्यात्तर्हि राजयोगः संन्यासजन्यान् सर्वान् अशुभप्रभावान् निहत्य मानवं दीक्षितनृपत्वेन स्थापयति।[50]

अनेन प्रकारेण सम्यकतया प्रव्रज्यायोगं चिन्तयित्वा यदि जीवनस्य प्रारम्भिकावस्थायाम् एव ज्ञानं स्यात् यद् अयं जातकः प्रव्राजकः भविष्यति तर्हि तदाधारेण भावीजीवनस्य आध्यात्मिकौन्नत्यर्थं तद्दिशि प्रयतते चेत् निश्चयेन तस्य जन्म सफलं भवति। ईदृशः यतिः न केवलं स्वहिते संलग्नो भवति अपितु शंकराचार्यवत् धर्मस्य, समाजस्य, राष्ट्रस्य च कल्याणकारकः सिद्धयति। अतः सर्वेषां हिताय प्रव्रज्यायोगज्ञानम् अवश्यमेव कर्त्तव्यम्।

**पादटिप्पणयः**

1 फलदीपिका

2 बृहत्पाराशरहोराशास्त्र / 79 /2-3

3 सारावली / 20 / 30

4 सारावली /20 / 31

5 उपासका बुद्धसमाश्रयं गताः शिखां विना पाण्डरभिक्षवश्च ये ।

सुवाससो रक्तपटा जितेन्द्रियाः प्रभुः सदैषां क्षितिजः प्रकीर्तितः ।। सारावली / 20 / 32

6 आजीविनां कुहुकिनां समयाधिकारे , ये दीक्षितास्तनुभृतः खलु गारुडे च ।

तन्त्रे मयूरपिशिताशनयोश्च युक्तास्तेषां शशांकतनयोऽधिपतिर्निरुक्तः ।। सारावली /20 /33

7 एकं त्रीनथवा वहन्ति मुनयो दण्डान् कषायाम्बर

वानप्रस्थमुपागताः फलपयोभक्षाश्च ये भिक्षवः ।

गार्हस्थ्येन तु संस्थिता नियमिनः सद्ब्रह्मचर्यं गता

स्तेषां दण्डपतिः सुरेन्द्रसचिवस्तीर्थेषु ये स्नातकाः । सारावली /20 / 34

8 पाशुपतयज्ञदीक्षाव्रतेषु ये नित्यमेव संयुक्ताः ।

वैष्णवचरकाणामपि तेषां नेता प्रकीर्तितः शुक्रः ।। सारावली /20 / 35

9 पाषण्डव्रतनिरता दिगम्बरा भिक्षवो ये च ।

तेषामधिपतिरार्किः श्रावकतरुमूलिनश्च दुस्तपसः ।। सारावली /20 / 36

10 फलदीपिका / 27 / 5

11जातकपारिजातः / 15 / 16

12 बृहज्जातकम् / 15 / 1

13 बृहत्पाराशरहोराशास्त्रम् / 80 / 53

14 फलदीपिका / 27 / 1

15 फलदीपिका / 27 / 2

16 फलदीपिका / 27 / 3

17 बृहत्पाराशरहोराशास्त्र /79 /8

18 फलदीपिका / 27 / 6

19 फलदीपिका / 27 / 8

20 बृहत्पाराशरहोराशास्त्र /79 /6-7

21 बृहत्पाराशरहोराशास्त्र /79 /5

22 बृहत्पाराशरहोराशास्त्र /79 /12-13

23 बृहत्पाराशरहोराशास्त्र /79 /14

24 बृहत्पाराशरहोराशास्त्र /79 /15

25 जातकपारिजातः / 15 /22

26 जातकपारिजातः / 15 /40

27 जातकपारिजातः / 15 /17

28 जातकपारिजातः / 15 /18

29 जातकपारिजातः / 15 /19

30 जातकपारिजातः / 15 /19

31 जातकपारिजातः / 15 /20

32 जातकपारिजातः / 15 /24

33 जातकपारिजातः / 15 /32

34 जातकपारिजातः / 15 /33

35 जातकपारिजातः / 15 /33

36 जातकपारिजातः / 15 /33

37 जातकपारिजातः / 15 /33

38 जातकपारिजातः / 15 /25

39 जातकपारिजातः / 15 /27

40 जातकपारिजातः / 15 /28

41 जातकपारिजातः / 15 /37

42 जातकपारिजातः / 15 /38

43 जातकपारिजातः / 15 /30

44 जातकपारिजातः / 15 /31

45 जातकपारिजातः / 15 /39

46 जातकपारिजातः / 15 /41

47 जातकपारिजातः / 15 /19

48 बृहत्पाराशरहोराशास्त्र /79 /11

49 बृहज्जातक / 15 /2

50 फलदीपिका / 27 / 7